# २०. रत्नवाहपुरकल्पः ।

श्री**धर्मनाथ**मानम्य **रत्नवाहपुरे** स्थितम् । तस्यैव पुररत्नस्य कल्पं किञ्चिद्ब्रवीम्यहम् ॥ १ ॥

अस्तीहैव **जम्बूद्वीपे** द्वीपे **भारते** वर्षे **कोशलेषु** जनपदे नानाजातीयोच्चैस्तरशाखिशाखाबहलदलकुसुमफलच्छन्नताच्छादितघर्मघृणिकरगहनवनमण्डितं शीतलविमलबहलजलनिर्झर**घर्घर**नदबन्धुरं **रत्नवाहं** नाम पुरम् । तत्र चेक्ष्वाककुलप्रदीपः कनत्कनककान्तकायकान्तिः कुलिशलाञ्छितपञ्चचत्वारिंशच्चापोच्छ्रायकायः पञ्चदशस्तीर्थपतिर्विजयविमानादवतीर्य श्री**भानु**नरेन्द्रवेश्मनि **सुव्रतादेवी**कुक्षौ तनयतयाऽवततार । क्रमेण गुरुवितीर्ण**धर्म**नामधेयो जनन-निष्क्रमण-केवलज्ञानानि तत्रैव समाससाद । निर्वृतश्च **संमेतशिखरि**शिखरे । तस्मिन्नेव च पुरे जननयनजनितशैत्यं श्री**धर्मनाथ**चैत्यं **नागकुमार**देवाधिष्ठितं कालेन निर्वृत्तम् ।

तत्र च नगरे कुम्भकार एकः स्वशिल्पच्छेक आसीत् । तस्य तनयस्तरुणिमानमधिगत्य क्रीडादुर्ललिततया तत्र रामणीयकशालिनि चैत्ये गृहादागत्य स्वैरं द्यूतादि तत्तत्क्रीडाविधाभिश्चिक्रीड । तत्रैको **नागकुमारः** केलिप्रियतया कृतमानुषतनुस्तेन कुम्भकारदारकेण सार्धं प्रत्यहं प्रववृते क्रीडितुम् । तत्पित्रा च स पुत्रः कुलक्रमागतकुलालकर्माण्यनिर्मिमाणः प्रतिदिनं दुर्वाग्भिरुपालेभे । न च तद्वचनमसौ प्रत्यपादि[1] । ततः पित्रा गाढं प्रहत्य बलादपि स्वकर्म्माणि मृत्खननानयनादीनि कारयितुमुपक्रान्तः । अन्तरमवलोक्य पुनस्तत्र चैत्ये गत्वाऽन्तराऽन्तरा तथैव तेन **नागकुमारेण** साकं खेलितुं लग्नः । पृष्टश्च **नागामरेण**–किं कारणं पूर्ववन्निरन्तरं न क्रीडितुमायासि ? । तेनोक्तम्–जनकः कुप्यति मह्यम् । स्वकर्मनिर्माणमन्तरेण कथमिव जठरपिठरविवरपूरणमुपपद्यत इति । तदाकर्ण्य **हृष्टकर्णकुमारो** वाचमुवाच–यद्येवं तर्हि क्रीडान्ते भूपीठे विलुठ्य भविष्याम्यहमहिः, मत्पुच्छं चतुरङ्गुलमात्रं लोहेन मृत्खननोपकरणेन छित्वा त्वया ग्राह्यम् । तच्च चारुचामीकरमयं भविष्यति । तेन हेम्ना तव कुटुम्बस्य वृत्तिनिर्वाहो भविष्यतीति सौहृदात्तेनाभिहिते स तथैव प्रतिदिवसं कर्तुं प्रवृत्तः । पितुश्च तत्कनकमर्पयति स्म; न च रहस्यमभिदत् । 0अन्यदाऽतिनिर्बन्धं विधाय पृच्छति सति पितरि भयाद्यथावस्थितमचकथत् । ततः सस्मितेन विस्मि0तेन च जगदे जनकेन–रे मूर्ख ! [2]चतुरङ्गुलमात्रमेव किमिति छिदन्नसि[3] ? । बहुतरे हि छिन्ने भूरितरं[4] भूरि भवन्ति । तेन भणितम्–तात ! नातः समतिरिक्तमहं छेत्तुमुत्सहे, परमसुहृद्दैवतवचनातिक्रमप्रसङ्गात् । ततस्तज्जनकेन लोभसंक्षोभाकुलितमनसा तस्मिंस्तनये क्रीडार्थं तच्चैत्यमुपेयुषि प्रच्छन्नमनु वव्रजे । यावत्प्रक्रीड्य धरणिपीठे विलुठ्य स पन्नगतामापन्नस्तावत् कुम्भकारेण बिलं प्रविशतस्तस्य वपुरर्द्धं कुद्दालिकया चिच्छेदे । ततः कोपाटोपात्तेन **नागकुमारेण**–रे पापिष्ठ ! रहस्यभेदं करोषीत्यतिगाढं निर्भर्त्स्य स दारको दंष्ट्रासम्पुटेन दष्ट्वा व्यापादितः, पिता च । रोषप्रकर्षात्सकलान्यपि कुलालकुलानि कालकवलितानि कृतानि । ततः प्रभृति च न कश्चन चक्रजीवनजातीयस्तत्र **रत्नवाहपुरे**ऽद्यापि निवसतीति । कौलालभाण्डानि स्थानान्तरादेव नयति जनता । तत्र च तथैव नागमूर्तिपरिवारिता श्री**धर्मनाथ**प्रतिमाऽद्यापि सम्यग्दृष्टियात्रिकजनैरनेकविधिप्रभावप्रभावनापुरःसरं पूज्यते । अद्यापि च परसमयिनो '**धर्मराज**' इति व्यपदिश्य कदाचिदवर्षति वर्षासु जलधरे क्षीरघटसहस्रैर्भगवन्तं स्नपयन्ति; सम्पद्यते च तत्क्षणाद्विशिष्टा मेघवृष्टिः । **कन्दर्पा** शासनदेवी **किन्नरश्च** शासनयक्षः श्री**धर्मनाथ**पादपद्मसेवाहेवाकचञ्चरीकाणामनर्थप्रतिघातमर्थप्राप्तिं चात्र सूत्रयतीति ।

इति श्री**रत्नवाहस्य** श्री**जिनप्रभ**सूरिभिः । कल्पः कृतो **रत्नपुर**पुराख्यस्य यथाश्रुतम् ॥ २ ॥

**॥ इति श्रीधर्मनाथजन्मभूमिरत्नपुर[5]तीर्थकल्पः ॥**

॥ ग्रं० ३२, अ० २३[6] ॥

---

1 B प्रणिपादि । 0-0 एतच्चिह्नान्तर्गतः पाठः परित्यक्तः A आदर्शे । 2 P विहायान्यत्र 'चतुरङ्गुलमन्यचतुर°' । 3 ABPa-b न च्छिनत्सि । 4 B भूरितरे । 5 Pa रत्नवाहपुरमहातीर्थ° । 6 A विहाय नास्त्यन्यत्र एषाऽक्षरसंख्या ।